श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीभाष्यकारप्रपत्तिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

His Holiness *śrīmad āṇḍavan* of *śrīraṅgam*

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीभाष्यकारप्रपत्तिः ॥

श्रीवैष्णवागमपयोदधि पूर्णचन्द्र
श्रीशाङ्घ्रिपद्म मकरन्दरसज्ञभृङ्ग।
गोविन्दवर्यकरसारसपूजितौ ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ १ ॥

श्रीशैलपूर्णमुखदेशिकलब्धबोध
तुर्याश्रमप्रथित मौनिकुल प्रदीप।
भट्टार्यवर्यकरनीरजपूजितौ ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ २ ॥

काञ्चीपुरीवरदराजकृपैकपात्र
रङ्गेश पूर्णकरुणा परिणामरूप।
वेदान्तदेशिककराम्बुज पूजितौ ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ ३ ॥

श्रीयादवाद्रि पतिपादसरोजहंस
श्रीभूतपट्टणरमेश कटाक्ष धन्य।
शेषावतार कलिवैरिकरार्चितौ ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ ४ ॥

श्रीवेङ्कटाचलपति प्रियलक्ष्मणार्य
सर्वज्ञभव्य यतिशेखर सार्वभौम।
वीक्षा वनेशहितकृष्णवनार्चितौ ते
श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ ५ ॥

पाषण्डजालतरुपावक सम्यमीन्द्र
जैनेभपञ्चमुखबौद्धतमो दिनेश।

www.prapatti.com

लोकार्यहस्तसरसीरुह पूजितौ ते
    श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ ६ ॥

चार्वाकशैलपतिवज्र कृपासमुद्र
    काणाददानव सुदर्शन मौनिचन्द्र।
श्रीवेङ्कटेशकरपङ्कज पूजितौ ते
    श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ ७ ॥

मिथ्याकथा कुमतिशीलभुजङ्ग तार्क्ष्य
    कापालिकाम्बुधरमारुत वीतराग।
मन्नाथ केशवगुरूत्तमपूजितौ ते
    श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ ८ ॥

त्रय्यन्तदेशिकपते वकुळाभिराम
    पादारविन्द रससारस सारसाक्ष।
श्रीमत् शठारि मुनिवल्लभ पूजितौ ते
    श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ ९ ॥

काषायरम्यकमनीय शिखोपवीत
    दण्डत्रयोज्ज्वल करोल्लसितोर्ध्वपुण्ड्र।
उद्यद्दिनेश रुचिशोभित पाहि मां ते
    श्रीभाष्यकारचरणौ शरणं प्रपद्ये॥ १० ॥

॥ इति श्रीभाष्यकारप्रपत्तिः समाप्ता ॥

www.prapatti.com